M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 1438

Title: Ramakalpadrum

1438

InComplete

		Rama kalpadrum	Title
			Author
			Editor
SK			Year, Vols.
			Publisher
1438		Pages 144	Remarks

॥ अथरामकल्पद्रुमप्रारंभोयम् छ ॥

श्रीगणेशाय शारदायै नमः श्रीगुरुभ्यो नमः श्रीनिवासब्रह्मणे नमः श्रीमत्त्रिपुरसुंदर्यै नमः नमामि जानकीजानिं पितरं कमलाकरं अंनाम
ंबधतींशीलां लक्ष्मीं लक्षणशालिनीं १ जगद्गुरोः ---- नविख्यातनिबंधकीर्तेः अनंतसंज्ञस्य तनदात्मजोसौ श्रीरामकल्पद्रुमनामा
तनोति २ सम्यक्ल्पानां ---------- तिषु विप्लवं कुर्वते येचतेवध्यंते मयाधुना ३ हेमाद्र्यादिनिबंधास्तु बहवः संतियद्यपि ॥
ते ------- पंडितैः सावधार्यताम् ४ आदौतुकालकांडंस्यात् श्राद्धकांडं द्वितीयकं व्रतकांडं तृतीयं स्यात् ---------- ॥५
प्रायश्चित्ताख्यमपरं शांतिकांडं तथापरं दानकांडं सप्तमं स्यादाचाराख्यं तथापरं ८ राजनीतिः प्रयोग --- कांडानि वै दशेति ॥ ॥
तत्र संवत्सरायनर्तुमासपक्षदिवसभेदेन कालः षड्विधः संवत्सरस्तु संम्य ---- दयोत्रेति व्युत्पत्त्या द्वादशमासात्मकः द्वादशमासाः
संवत्सर इति श्रुतेः यदात्वधिकमासो भवति तदापूर्वोपि दिवसैः मासः कथितो बादरायणेरिति वचनान्मासद्वयात्मिक एक एव मास इष्यते
द्वादशमासत्वमविरुद्धं सच संवत्सरश्चांद्रसावनसौरमासात्त्रैविध्यात्त्रिविध इति हेमाद्रिः मासत्रैविध्यमनुपदं वक्ष्यंते ब्राह्मसिद्धांतेपि ॥
चांद्रसावनसौराणां मासानां तु प्रभेदतः चांद्रसावनसौरास्युस्त्रयः संवत्सरा अपीति नाक्षत्रस्तु संवत्सरस्तन्मते नागस्त्येव भमानां विनिति दी
पिकायामुक्तेश्च बार्हस्पत्यस्तु संवत्सरो ज्योतिःशास्त्रे प्रसिद्धः तस्य धर्मशास्त्रे न काप्युपयोग इति हेमाद्रिः तत्र चैत्रशुक्लप्रतिपदि

श्रीः राम·कृ·

१

सृष्ट्यादौ सर्वेषां संवत्सराणां मासादीनां चारंभः तथा च हेमाद्रौ ब्रह्मसिद्धांते चैत्रसितादेरुदयाद्भानोर्दिनमासवर्षयुगकल्पाः सृष्ट्या
दौ लंकायां समं प्रवृत्ता दिनेऽर्कस्य तथा च चांद्रः प्रभवादिश्चैत्रशुक्लप्रतिपदि प्रवर्तते तस्य षष्टिभेदानाह नारदः प्रभवो विभवः शु
क्लः प्रमोदोऽथ प्रजापतिः अंगिराः श्रीमुखो भावो युवा धातेश्वरस्तथा १ बहुधान्यः प्रमाथी च विक्रमोऽथ वृषस्तथा चित्रभानुः सुभानु
स्तारणः पार्थिवो व्ययः २ सर्वजित्सर्वधारी च विरोधी विकृतिः खरः नंदनो विजयश्चैव जयो मन्मथदुर्मुखौ ३ हेमलंबी विलंबी
च विकारी शार्वरी प्लवः शुभकृच्छोभकृत्क्रोधी विश्वावसुपराभवौ ४ प्लवंगः कीलकः सौम्यः साधारणविरोधिकृत् परिधावी प्र
मादी च आनंदो राक्षसोऽनलः ५ पिंगलः कालयुक्तश्च सिद्धार्थी रौद्रदुर्मती दुंदुभी रुधिरोद्गारी रक्ताक्षी क्रोधनः क्षय इति ६० अद्य
प्येताः संज्ञाः ज्योतिषे बार्हस्पत्यस्यैवोक्तास्तथापि चांद्राणां प्रभवादीनां पंचके पंचके युगे इति माधवोक्तेश्चांद्रस्याप्येता ज्ञेयाः यत्तु हेमा
द्रौ विष्णुधर्मे माघशुक्लसमारंभे चंद्रार्कौ वासवर्क्षगौ जीवयुक्तौ यदा स्यातां षष्ट्यब्दादिस्तदा स्मृत इति माघशुक्लप्रतिपदुपक्रमत्वं
प्रभवादिसंवत्सराणामुक्तं तज्ज्योतिःशास्त्रप्रसिद्धशुभाशुभफलप्रतिपादनार्थं न धर्मानुष्ठानार्थमिति हेमाद्रिः तथा च संकल्पादौ स
र्वत्र चांद्रस्यैवोल्लेखः कार्यो नान्येषां संवत्सराणां तथा चार्षिषेणः स्मरेत्सर्वत्र कर्मादौ चांद्रं संवत्सरं सदा नान्यं यस्माद्वत्सरादौ प्रवृत्ति

श्रीः

१

स्तस्य कीर्तितेति वसुब्रह्मसिद्धांते व्यावहारिकसंज्ञोऽयं कालः स्मृत्यादिकर्मसु योज्यः सर्वत्र तत्रापि जैवो वा नर्मदोत्तर इति बार्हस्पत्याब्दस्य पक्षेम
स्याविहितमपि विवाहादिकर्मणि नियोगप्रतिपादकं नच नंत जैवमानेनापि तच्छुभाशुभफलाद्यालोचनार्थं अतएव ज्योतिर्विदः जैवमाने
नापि कर्मकृत्समाचारादयः कृताचाराभ्युदयेति नत्वेतन्मतान्तरसंकल्पादावुपयोगइति ध्येयं हेमाद्रौ ब्रह्मपुराणे चैत्रेमासि जगद्ब्रह्मा ससर्ज प्र
थमेऽहनि शुक्लपक्षे समग्रं तु तदा सूर्योदये सति प्रवर्तयामास तदा कालस्य गणनामिह ग्रहान्नागानृतून्मासान्वत्सरान्वत्सराधिपानिति
॥ इति वत्सरनिर्णयः अथायनं तत्सौरर्त्तुत्रयात्मकं तथा च दीपिकायां सौरर्त्तुत्रितयं प्रदिष्टमयनमिति यच्च द्विविधं दक्षिणायनमुत्तरायनं
च कर्कसंक्रांतिर्दक्षिणं मकरे द्वितीयं तथा च श्रुतिः तस्मादादित्यः षण्मासान्दक्षिणेनैति षडुत्तरेणेति सत्यव्रतः देवतारामतडागादिप्रति
ष्ठारुद्रोत्सवो दक्षिणायनगेऽनुष्ठेयं न तत्फलमवाप्नुयात् मदनरत्ने वैखानसः मातृभैरववाराहनृसिंहत्रिविक्रमाः महिषासुरहंत्र्य
श्च स्थाप्या वै दक्षिणायने ज्योतिषे गृहप्रवेशत्रिदशप्रतिष्ठाविवाहचौलव्रतबंधपूर्वं सौम्यायने कर्मशुभं विधेयं यद्गर्हितं तत्खलु दक्षि
णे च कालमातुर्दक्षिणायनादिदोषः मदालसत्ययुगं चात्र सदाचारस्तूत्तरायणमिति काशीखंडात् इत्ययननिर्णयः अथर्त्तु
निर्णयः तत्र वसंतो ग्रीष्मो वर्षा शरद्धेमंतशिशिरा इति षडृतवः प्रत्येकं द्वेधा चांद्राः सौराश्च चांद्राः वसंतादयश्चैत्रारंभाः मीना

रंभाम्रेषारंभावासौरा: तथाच बौधायनः मीनमेषयोर्मेषवृषयोर्वावसंतइति त्रिकांडमंडनः श्रौतस्मार्तक्रियाः सर्वाःकुर्याच्चांद्रमसेनतु
तदभावेतुसौरेणपितिज्योतिर्विदांमतमिति इतिऋतुनिर्णयः मासश्चतुर्धा तथाचमदनरत्नेस्मृतिः प्रथमःसावनोमासोद्वितीय
श्चांद्रउच्यते नाक्षत्रस्तुतृतीयस्यात्सौरोमासश्चतुर्थकमिति त्रिंशद्दिनःसावनः शुक्लादिरमांतः कृष्णादिःपौर्णिमांतश्चांद्रः ॥
चंद्रस्यसर्वर्क्षपरिवर्तैर्नाक्षत्रोमासः तदुक्तं सर्वर्क्षपरिवर्तैस्तुनाक्षत्रोमासउच्यतेइति संक्रांतिमारभ्यसंक्रांतिपर्यंतःसौरः तत्रचित्रानक्ष
त्रयुक्तपौर्णमासीयत्रसचैत्रइतिचांद्रस्यैवमुख्याचैत्रादिसंज्ञा एवंवैशाखादिष्वपि एवंमासइतिसामान्यसंज्ञापिमस्यैवपरिभाषितचंद्र=
र्द्धिक्षयादिनामासमासइतिव्यक्तत्वात्तिश्चांद्रएव अन्यत्रगौणी तथाचदीपिकायां मुख्येवमासाभिधाचांद्रेन्यत्रगुणाश्रयादिति द्विविध
चांद्रमध्येपिशुक्लादिर्मुख्यः कृष्णादिर्गौणः चैत्रशुक्लप्रतिपद्येवमासारंभात् कृष्णादिनामलमासासंभवाच्च तत्रव्यवस्थामहाद्रि
कांडमंडनः कृष्णपक्षादिकंमासंनर्मदायांकुर्वतिनिकेचन येषांचतिनतेषामपीष्टोविंध्यस्यदक्षिणेइति तथाचविंध्यदक्षिणेकृष्णादिमासनि
षेधमत्यक्तत्वात्तोहेमाद्रिप्रभृतिभिरपिपितृचरणाः अस्यापवादः विवाहव्रतयज्ञेषुसौरमानंप्रशस्यते पार्वणेत्वष्टकाश्राद्धेचांद्रमिष्टंतथाब्दिके ॥
तथा एकोद्दिष्टविवाहादौकरणादौसौरमावमौ यत्तुअमावास्यापरिच्छिन्नोमासःस्याद्ब्राह्मणस्यतु संक्रांतिपौर्णमासीभ्यांतथैवनृपवैश्य

योरितिवचनंतद्यत्रकर्मविशेषेब्राह्मणादीनांमासविशेषाविधिस्तत्रैवदर्शांतत्वनियमार्थं नतुसर्वकर्मसुब्राह्मणस्यदर्शांतइतिपितामहचरणाः ॥
गर्गः नक्षत्रसत्रायणयनानिचंद्रोमासेनकुर्याद्गणनास्वकेनेति इतिमासनिर्णयः पक्षोद्विविधः कृष्णःशुक्लश्च चंद्रकलाक्षयोपलक्षि
तःकृष्णः चंद्रकलावृद्ध्युपलक्षितःशुक्लः तयोर्विनियोगमाह माधवः दैवेमुख्यःशुक्लपक्षःकृष्णःपित्रेविशिष्यतइति इतिपक्षनिर्णयः ॥
दिवसश्चतुर्विधः चांद्रसावनसौरनाक्षत्रभेदात् तथाचविष्णुधर्मोत्तरे तिथिनैकेनदिवसश्चांद्रेमानेप्रकीर्तितः अहोरात्रेणचैकेनसावनोदिव
सःस्मृतः आदित्यराशिभोगेनसौरोदिवसउच्यते चंद्रनक्षत्रभोगेननाक्षत्रोदिवसःस्मृतइति इतिदिवसनिर्णयः अथतिथिनिर्णयः ॥
तत्रतिथिःशुक्लप्रतिपदमारभ्य अमादिपौर्णमास्यंताः एवंत्रिंशत्तिनःकालाः तिथयस्ताःसमाख्याताःषोडशैवकलाननोद्विति सातिथिर्द्वेधासंपूर्णाखं
डाच तत्रसंपूर्णाकालखंडे प्रतिपत्प्रभृतयःसर्वाउदयादोदयाद्रवेः संपूर्णाइतिविख्याताहरिवासरवर्जिता हरिवासरःएकादशी तत्रसंपूर्णत्वमेकाद
शीनिर्णयेवक्ष्यते तत्रसंपूर्णायाअनिर्णेयत्वात्खंडानिर्णीयते खंडादिनद्वयसंबंधिनी तस्यादिनद्वयसंबंधिन्याव्रतादौपूर्वापरायाग्राह्यत्वेन
चिंत्यते तस्यासामान्यनिर्णयमाहपैठीनसिःपक्षद्वयेपितिथयस्तिथिंपूर्वांतथोत्तरां त्रिभिर्मुहूर्तैर्विध्यंतिसामान्योयंविधिःस्मृतः कौशिकसूत्रद्विमुहूर्तो
क्तवान्तः तथाचविष्णुधर्मे अदितदपत्तभानापित्र्यंचांत्तामितरेवा द्विमुहूर्तास्त्रिरूक्ष्वसातिथिर्हव्यकव्ययोरिति अत्रचद्विमुहूर्तापिकर्तव्यायातिथि
र्हीयमानगामिनीतिदक्षोक्तावपवादाद्विमुहूर्तात्वमनुकल्पः सायंतुत्रिमुहूर्तेवेधः सायंतनत्वादहन्यनयानतुविध्यतइतिमाधवोक्तेः ॥ ॥

रा·कृ·म· दीपिकायामपि त्रिमुहूर्तगा तु या कार्या सा युग्मेति स्कांदेपि यां तिथिं समनुप्राप्य यात्यस्तं पद्मिनीपतिः सा तिथिस्तद्दिने प्रोक्ता त्रिमुहूर्तैव या भवेदिति
येन मंत्रा दत्त वचनानि चयवलाद्दिनमध्यात् एव पूर्वोत्तरतिथ्योः प्रवेशो वेधः तेनाहोरात्रमध्ये न्यतिथिप्रवेशो वेधं वदन्तु पूर्वः सामिलुत्रतोपवासनियमे
३ मार्कंडेयापि यामत्रेदित्यादि निवचनानि तानि त्रिमुहूर्तप्रवेशपराणीति न्यायविदः कासुचित्तिथिषु वेधान्तरोपस्कांदे नागो द्वादशनाडीभिर्दिक् ॥
पंचदशभिस्तथा भूतोष्टादशनाडीभिर्दूषयत्युत्तरां तिथिमिति इति वेधः न त्र सर्वा तिथिः कर्मकालव्यापिनी ग्राह्या कर्मणो यस्य यः कालस्तत्
कालव्यापिनी तिथिरिति हेमाद्रौ स्कांदे मतः तत्र परेद्युरेव कर्मकालव्याप्तिः पूर्वेद्युरेवोभयेद्युरनुभयेद्युरुभयत्र साम्येनैकदेशेनेति षट्पक्षाः ॥
तत्रैकव्याप्तौ सैव ग्राह्या यस्मिन्काले तु यत्कर्म तत्तिथौ पूर्वोक्तवचनात् वैषम्येण कर्मकालव्याप्तौ तत्राधिक्यान्निर्णयः उभयत्र संपूर्णव्याप्तावव्याप्तौ
तथोभयत्र साम्येन व्याप्तौ युग्मवाक्यान्निर्णयः युग्मवाक्यं तु निगमे युग्माग्नियुगभूतानां षण्मुन्योर्वसुरंध्रयोः रुद्रेण द्वादशीयुक्ता चतुर्द
श्या च पौर्णिमा प्रतिपद्यप्यमावास्या तिथ्योर्युग्मं महाफलं एतद्व्यस्तं महादोषं हंति पुण्यं पुराकृतं इति रंध्रं नवमी रुद्र एकादशी युग्माग्नीति
द्वितीया तृतीया कृता सा चतुर्थ्यादिद्वितीयायुतेत्यर्थः अतस्तत्सारेपि पक्षद्वयेप्यमावास्यायाः कृष्णपक्षे चतुर्दश्या एताः पूज्याः पराः पूर्वेण संयु ३
ता इति ... तु यद्दिने ... एकदेशव्याप्तिर्दिनद्वयेपि तदभावो वा तदापि क्वचिन्नवरात्रादौ न युग्मवाक्यान्निर्णयः तथा लक्ष्मी
युक्ता या प्रतिपदा ... ग्राह्यास्तु कं एवं यदा युग्मदिने कर्मकालव्याप्तिर्युग्मादिने च तदभाव

रा·कृ·म· स्तदा युग्मदिनमेव ग्राह्यमित्यादि हेमाद्रौ स्पष्टं इदं च युग्मवाक्यं शुक्लपक्षविषयं अमाप्रतिपद्युग्मस्य चतुर्दशीपौर्णमासीयुग्मस्य च तत्रैव
सत्वात् स्मृत्यंतरे संपूर्णा दशमी कार्या मिश्रिता पूर्वया थवा संपूर्णा कर्मकालव्यापिनी विष्णुधर्मोत्तरे शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्यु
दितो रविः कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविरिति संमतः त्रयोदशी तु कर्तव्या द्वादशीसहिता मुने इति यत्तु प्रतिपत्सद्वितीया
स्याद्वितीया प्रतिपद्युता चतुर्थीसंयुता या च सा तृतीया फलप्रदेति वचनं तत्कृष्णपक्षविषयं कृष्णपक्षेष्टमी चैव कृष्णपक्षे चतुर्दशी
पूर्वविद्धा न कर्तव्या परविद्धा न कुत्रचिदिति वचनात् अयं च युग्मवाक्यान्निर्णयो व्रतदानादिदैवकर्मण्येव पित्र्ये तु खर्वादिना निर्णयः ॥ ॥
तथा च व्यासः द्वितीयादिषु युग्मानां पूज्यता नियमादिषु एकोद्दिष्टादिके ध्यादौ ह्रासवृद्ध्यादिचोदनेति एकोद्दिष्टादीत्यादिशब्देन पार्वण
श्राद्धसंग्रहः वृध्यादावित्यनेन कर्मांगश्राद्धसंग्रहः ह्रासादिकं त्वाह व्याघ्रः खर्वो दर्पस्तथा हिंसा त्रिविधं तिथिलक्षणं खर्वदर्पौ परौ पूज्यौ
हिंसा स्यात्पूर्वकालिकीति खर्वः साम्यं दर्पो वृद्धिः हिंसा क्षयः वृद्धिक्षययोश्च कपिलाद्यतिथेः कश्चिच्चेतरतिथेरित्यादि तत्र तत्र वक्ष्यते कर्मका
लव्याप्त्यालाभे तु कर्मोपक्रमकालगा तिथिर्ग्राह्या कर्मोपक्रमकालगानुक्रमिभिर्ग्राह्या न युग्मादर इति दीपिकावचनात् यत्तु यां तिथिं
समनुप्राप्य उदयं याति भास्करः सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु इति देवलवचनं तत्त्रिमुहूर्तस्तुतिः ॥ ॥ इति सामान्यनः स